Barcode : 5010010005370
Title - Nipatavyayopasargavritti
Author - P V Ramanujaswami
Language - sanskrit
Pages - 84
Publication Year - 1951
Barcode EAN.UCC-13



SRI VENKATESVARA ORIENTAL SERIES—No. 28

Editor :—PROF. P. V. RAMANUJASWAMI, M.A.

NIPATAVYAYOPASARGAVRITTI

OF

TILAKA

EDITED BY

APPALLA SOMESVARA SARMA, Vidya Pravina, P.O.L.

VYAKARANA LECTURER

Sri Venkatesvara Oriental College. Tirupati

PUBLISHED UNDER THE AUTHORITY OF

SRI C. ANNA RAO, B.A.

EXECUTIVE OFFICER

T. T. Devasthanams on behalf of the Board of Trustees



PRINTED AT

TIRUMALA-TIRUPATI DEVASTHANAMS PRESS

TIRUPATI

1951

श्रीवेङ्कटेश्वरप्राच्यग्रन्थावली. सं. २८

सम्पादकः – श्रीपरवस्तु वेङ्कटरामानुजस्वामी, एम्. ए.

श्रीः

श्रीनिवासो विजयते

निपाताव्ययोपसर्गवृत्तिः

तिलक्कृतिः

श्रीवेङ्कटेश्वरप्राच्यमहाविद्यालयव्याकरणोपाध्यायेन

"व्याकरणसाहित्यविद्याप्रवीण" द्युपाधिभाजा

कौत्सेन अप्पल्ल सोमेश्वरशर्मा, P. O. L. इत्यनेन

सविशेषं परिष्कृता

तिरुपति

तिरुमलै - तिरुपति देवस्थानमुद्रणालये

मुद्रिता

१९५१.

श्रीः

उपोद्घातः ।

कृतिरियं श्रीवेङ्कटेश्वरप्राच्यमहाविद्यालयकुलपतिभिः **श्रीमत्परवस्तु वेङ्कट-रामानुजस्वामिभिः** संपादिता । न्यवसच्चेयं दीर्घकालं संपादकानां पितामहैः पूज्यपादैः कविपण्डितसार्वभौमैः कीर्तिकायैः महामहोपाध्यायैः **श्रीमत्परवस्तु वेङ्कटरङ्गाचार्य**महाशयैः प्रतिष्ठिते आर्षज्ञाननिलयभूते "आर्षग्रन्थालय"नाम्नि पुस्तकभाण्डागारे । विशाखपट्टणस्थमिदं पुस्तकागारं निधिनिभं बहूनि उत्तमानि अपूर्वाणि ज्ञानविज्ञानदायकानि संस्कृतान्ध्रमयानि ग्रन्थरत्नानि लोकाय पूर्वं व्यतरत्—अद्य वितरति—उत्तरत्र वितरिष्यति चेति विदितचरमेवेदं ज्ञानां समेषाम् । तादृशेषु रत्नेषु अन्यतममिदं कृतिरत्नं एतर्हि श्रीमतां संपादकानां श्रद्धावशात् अभिव्यक्तमिति महदिदं प्रमादस्थानम् ।

अद्ययावत अयं ग्रन्थः न कुत्राऽपि प्रकाशितपूर्व इति च अपरं प्रमोदास्पदम् । अस्य प्रतिकृतिस्तावत् आन्ध्रलिप्यां क्रीस्तुशकीये १९११ (1911 A. D.) वत्सरे लिखिता विराजते । संपादकानामग्रजैः **श्रीमत्परवस्तु वेङ्कटरङ्गनाथ-स्वामि**महोदयैरेषा समलेखि । अस्यां ग्रन्थतत्कर्तृविषयकं चरितं लेशतोऽपि नोट्टङ्कितम् । केवलमादितः प्रभृति आन्तं ग्रन्थ एव संकलितः । अतो ग्रन्थाऽगमादिविषयके चरितज्ञाने वयं सहायशून्याः जाताः स्मः । प्रतिकृत्यन्तरस्य कुत्राऽपि अनुपलम्भाच्च विमर्शस्य संवादस्य वा अवकाशः सुतमां नाजनि ।

ग्रन्थममुं संपादकाः निरवधिकेन वात्सल्येन अन्तेवासिने मह्यं परिष्कारार्थमदुः । यथाशक्ति ज्ञानलेशेन अहमिमं पर्यष्कार्षम् । प्रतिकृतौ तत्रतत्र लेखने साङ्कर्यमवर्तत । पौर्वापर्यं क्वचिन्नष्टम् । अवान्तरविभागादिकमपि कुत्रचित् न अवालम्बि । एतदादिकं सर्वं मर्यादामनतिक्रम्य मया सुष्ठु संकलितम् । तत्रतत्र ग्रन्थोऽपि ईषल्लुप्तः । तादृशो भागः प्रायेण तथैव विसृष्टः । यत्र यत्र अर्थविषये विषयान्तरे वा संशयादिकं जायते तत्रतत्र कुण्डलीकरणपश्चिह्नाङ्कनादिना सर्वं

पाठकसौलभ्यार्थं सूचितं वर्तते । यथावसरं पुटानामधस्तात् विवरणकमपि संनिवेशितम् । मात्रामात्रमपि कल्पना न मया कृतेति तु विभावयेत ।

" निपाताव्ययोपसर्गवृत्तिः " इति नाम्नैव अतीव प्रकटं भवति यदत्र निपातानामव्ययानामुपसर्गाणाञ्च व्याख्यानं विद्यते इति । ग्रन्थेऽस्मिन् काण्डत्रयं वर्तते । निपातकाण्डम्, अव्ययकाण्डम्, उपसर्गकाण्डम्, इति च यथाक्रमं काण्डानां नामधेयानि । प्रथमद्वितीये काण्डे सूत्रतद्व्याकृतिरूपेण तृतीयकाण्डं पद्यतद्विवरणरूपेण च दर्शीप्यते । सर्वत्राऽपि अल्पाल्पा विवृतिः लौकिकवैदिकसाधारणानि उदाहरणानि च संगृहातानि वरीवृतति । रीतिरियमपूर्वा सर्वसुभा तलस्पर्शिनी चेति नाऽस्ति अत्र विचिकित्सा । ईषद्वैषम्येण द्विशतं निपातानां सार्धद्विशतमव्ययानां द्वाविंशतिश्च उपसर्गाणामत्र व्याकार्षीत् । प्रसङ्गवशात् उपसर्गकाण्डान्ते काश्चन गतयोऽपि प्रदर्शिताः । परंतु गत्यर्थं पृथग् विभागः न कल्पितः ।

वृत्तेश्च अस्याः प्रणेता " तिलकः " इति " निजकुलतिलकास्तिलकस्तिलकयति निदर्शनैरेव " इति ग्रन्थादिवचनेन " इति निपाताव्ययोपसर्गवृत्तौ तिलककृतायाम् " इत्यादिकाण्डान्तगद्येन च अवगम्यते । परमत्र एको विशेषः प्रतिभाति । तथाहि—" क्षीराब्धिप्रसृताव्ययरत्नमालया विदुषः " इति ग्रन्थारम्भपद्ये भासमानेन श्लेषेण " भट्टक्षीरस्वाम्युत्प्रेक्षितनिपाताव्ययोपसर्गीये " इत्यादि तृतीयकाण्डान्ते भासमानेन गद्येन च भट्टः क्षीरस्वामी प्रकृतांशे तिलकस्य अवलम्बो बभूवेति निश्चप्रचं विज्ञायते इति । संदर्भे अस्मिन् एकः संशयोऽपि विमर्शकानां हृदि उत्पद्येत । " किमत्र मूलं क्षीरस्वामिना विरचितं स्यात् ? " इति । " वृत्तिः " इति ग्रन्थाभिख्याऽपि अंशो अस्मिन् साधिका संपद्यते किल । इदमत्र समाधेयम् । क्षीरस्वामिविरचिताममरसिंहकोशव्याख्यामवलम्ब्य तिलकेनैव सर्वं प्रणीतं भवेत् । कृतज्ञता च पूर्वोक्तरीत्या सूचिता स्यात् इति । इतोऽधिकं विमर्शकर्दमे अवसादस्तु संग्रहाभिलाषिभिरस्माभिः उपेक्षितः ।

नामलिङ्गानुशासनव्याख्यातृषु अतीव प्रसिद्धः क्षीरस्वामीतु एकादशे क्रीस्तुशताब्दे अवर्तत इति चरितज्ञानामाशयः । अतः क्षीरस्वामिनः परः तिलकः एका-

दशक्रीस्तुशताब्दात् परएवेत्यत्र न कोऽपि विशयलेशः । यस्य कस्याऽपि साधनस्य अनुपलम्भात् ग्रन्थकर्तृविषये एतदपेक्षया न एकमपि पदं पुरः प्रक्षेप्तुं उत्सहामहे । यदि केऽपि चरितपरिशोधकाः तिलकचरितं आविष्कुर्युः तर्हि तान् प्रति कृतज्ञाः भवेम । अयं तु आस्माक आन्तर आशयः — "सुश्लिष्टां सूत्ररचनां मृदुमधुरां विवृतिं लोकवेदसाधारणानि उदाहरणानि च पश्यद्भिः नूनमयं तिलकः यः कोऽपि प्राचीन एव वैयाकरणकुलतिलको भवेदिति अनुमातुं शक्यते, ' इति ।

कृतिरत्नमिदं पार्थक्येन निपाताव्ययोपसर्गविषये सकलसंशयापनोदकत्वात् साधुप्रयोगबोधकत्वाच्च गीर्वाणभाषाभिलाषिणामतीव उपयुज्यत इति सुदृढं विश्वसिमः । एतादृशं निगूढं रत्नं कलयतां संपादकानां प्रकाशयतां श्रीवेङ्कटेश्वरदेवस्थानाधिकृतानां च औदार्यं विबुधश्लाघ्यं विलसतीति अन्ततो वक्तव्यं प्रधानं वचः ।

दोषज्ञाः यद्यत्र मदीये परिष्कारादिके कर्मणि दोषान् पश्येयुः तर्हि कृपया क्षन्त्वा स्वीयां गुणज्ञतामेव प्रकटयितुमर्हन्तीति सप्रश्रयं विज्ञापयामि ॥

श्रीवेङ्कटेश्वरप्राच्य-
महाविद्यालयः,
तिरुपति
१५-११-१९५१.

इति
विज्ञापयिता विबुधविधेयः
अप्पल्ल सोमेश्वरशर्मा, P. O. L.,
व्याकरणसाहित्यविद्याप्रवीणः । व्याकरणाचार्यः ॥

विषयसूचिका

१. निपातकाण्डम् .... १—२१

२. अव्ययकाण्डम् .... २२—३५

३. उपसर्गकाण्डम् .... ३६—५३

४. अनुक्रमणिकाः—

१. सूत्रानुक्रमणिका .... ५४—५८

२. श्लोकानुक्रमणिका .... ५८—५९

३. निपातानुक्रमणिका .... ६०—६३

४. अव्ययानुक्रमणिका .... ६४—६८

५. उपसर्गानुक्रमणिका ६९

श्रीः

श्रीवेङ्कटेशो विजयते ॥

ओँ श्रीगुरवे सरस्वतीरूपाय नमः ॥

नमो विघ्नहर्त्रे ॥

नमः सूर्यादिभ्यो नवग्रहेभ्यो नमः ॥

॥ निपाताव्ययोपसर्गवृत्तिः ॥

[प्रथमं निपातकाण्डम् ।]

श्लोः—नत्वेशं क्षीराब्धिप्रसूताव्ययरत्नमाल्या विदुषः ।
निजकुलतिलकस्तिलकस्तिलकयति निदर्शनैरेव ॥

द्योतकाः निपाताः ॥ १ ॥

नामाख्यातयोर्धर्मप्रातव्यञ्जकाः । अत ऊर्ध्वं चादयो निपाता अधिक्रियन्ते । यतः ।

प्रायशो द्योतकाश्चाद्या निपाता द्रव्यवृत्ति तु ।
स्वराद्यमव्ययं प्राद्या न धात्वर्थविशेषकाः ॥ १ ॥

कर्मप्रवचनीयास्तु क्रियासंबन्धभेदकाः ।
ऊर्याद्या गतयो वृत्तौ कार्यार्थं सर्वमव्ययम् ॥ २ ॥

किंच ।

इयन्त इति संख्यैषामर्थेयत्ता च नास्ति वै ।
प्रयोजनवशादेत्य निपतन्ति परे पदे ॥ ३ ॥

च समुच्चयान्वाचयतुल्ययोगिताहेतुषु ॥ २ ॥

समुच्चये— गार्ग्यो वात्स्यश्चागतौ । पचतिच पठति च चैत्रः । समाहारेतरेतरयोगविनियोगास्समुच्चय एव । अनेकार्थैकत्व प्रचयात् । गार्ग्यवात्स्यावहं त्वंच वृत्त-

ह्न् ॥ अन्वाचये — भिक्षामट गाञ्चानय । गवानयनमत्राऽप्यधीनम् । तुल्ययो-गितायाम्— ध्यातश्चोपस्थितश्च । हेतौ—ग्रामो न गन्तव्यः शीतं च । शीतात् कथं गच्छामीत्यर्थः ॥ पूरणेऽप्याहुः । यथा— भीमः पार्थस्तथैवच । रात्रौ नैवच नैवच । चोद्यार्थे ॥ त्वं चागमिष्यसि कृतार्थाः स्मः । त्वं यद्यागमिष्यसी त्यर्थः । कामः कुविन्दश्च । यद्यर्थ इति विशेषार्थः ॥

वा विकल्पोपमानद्वन्द्वसमुच्चयेषु ॥ ३ ॥

विकल्पे— यवैर्वा व्रीहिभिर्वा यजेत । उपमायाम् — आशीविषो वा संक्रुद्धः सूर्याद्वाऽत्र विनिर्गतः । भीमोन्तको वा समरे गदापाणिरदृश्यत । द्वन्द्वे — सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम । नतृतीयेत्यर्थः । समुच्चये — वायुर्वा त्वा मनुर्वा त्वा ॥

अह क्षिपादेशयोः ॥ ४ ॥

क्षिपायाम्— स्वयमहाऽहवेन याति गुरुं पदातिं गमयति । आदेशे— अयमहाऽरण्यं यातु ॥ प्रशंसायामप्याहुः । अह बालो वक्ति । उत्कृष्टं वक्तीत्यर्थः ॥

ह आगमे च ॥ ५ ॥

आगमे— इति ह स्माहुः । क्षिपायाम्— स्वयं ह ओदनं भुङ्क्ते गुरुं भक्तून् पाययति । आदेशे— त्वं ह ग्रामं गच्छ (सि ?) । निन्दायामप्याहुः । त्वं ह ब्राह्मण । त्वमपि किं ब्राह्मण इत्यर्थः ॥

एवावधारणनियोगयोः ॥ ६ ॥

अवधारणे— त्वमेव देव जानासि । नियोगे— अद्यैव आवां रणमुपा-गतौ । अनवबलमात्रेऽप्याहुः । चैत्र केव मोक्ष्यसे ॥

एवं निश्चयाङ्गीकारप्रकारप्रकृतपरामर्शोपदेशनिर्देशेषु ॥ ७ ॥

निश्चये — एवमित्थं यथात्थ त्वम् । अङ्गीकारे— एवं कुर्मः । प्रकारे— यथाग्निरेवं विप्रः । प्रकृतपरामर्शे— एवं वादिनि देवर्षौ । उपदेशे— एवं पठ । निर्देशे— एवं तावत् ॥

नो निषेधे ॥ ८ ॥

नो जानीमः ॥

न नकिरुपमानेऽपि ॥ ९ ॥

उपमाने —मृगो न भीमः कुचरो गिरिष्ठः । मृग इव भीम इत्यर्थः । मेघो नकिर्वर्षसि (हेमराजा ?)ः (हेमराशिम् -- यद्वा -- हेपराजिम्)। मेघ इवेत्यर्थः । निषेधे— नान्तरीयकत्वात् । त्रित्वाभावात् नञ्समासाभावे नलोपो नास्ति । मूको नकिर्वक्ति हि प्रेम्णा निमित्तेसतीति । द्वौ भिन्नार्थौ ॥

नञ् तुल्यान्यविरुद्धाभावेषदर्थेषु ॥ १० ॥

तुल्ये-- अब्राह्मणमानय । ब्राह्मणसदृशं क्षत्रियादिमित्यर्थः । अन्यार्थे— अनग्निर्जलम् । विरुद्धे -- अधर्मः पापम् । अनर्थः । अभावे - अभावो मक्षिकानां अमक्षिकं वर्तते । ईषदर्थे— अल्पघोषाः = अघोषाः । अवक्षेपो विरोध एव । अपचसि जाल्म । अन्नं पक्तुं न जानासीत्यर्थः। अकारो नञिति विशेषणार्थः । अकारो निषेधे । स्वरप्रतिरूपत्वात् । अविप्र इव भाषसे । विप्रवन्नवर्क्षात्यर्थः । अन्योन्येऽप्याहुः । अनुपमः ॥ (?)

माङ्मास्माकिर्वारणे ॥ ११ ॥

माकार्षीः । मास्म करोति (तु?) । रक्षा माकिर्नो अघशंस ईशत । नः = अस्माकम् । रक्षाः = राक्षसाः । अघशंसः = पापिष्ठाः । माकिरीशत = माप्रभवन्त्वित्यर्थः । ङकारो माङि लुङिति विशेषणार्थः ॥

मा शङ्कायां च ॥ १२ ॥

शङ्कायाम्— अत्याकृष्टम्.....? (धनुर्मा) माऽत्याङित्। मा करिष्यति साहसम् । वारणे— मा पिब ॥

नेत् शङ्कायाम् ॥ १३ ॥

नेज्जिह्मयन्तो नरकं पताम । कदाचित् पापाचारा निरयं गच्छामेत्यर्थः ॥

चेद्यदीत्थं वारणोपदेशे ॥ १४ ॥

सचेद्याधीयेत गुरोरुच्छिष्टं भुञ्जीत । यदि सर्वमनित्यमिदं नभवेदिह जन्मनि कस्य रतिर्नभवेत् । सविद्वानित्थं पूज्यः ॥

नूनं निश्चयवितर्कयोः ॥ १५ ॥

निश्चये — नूनं हन्ताऽस्मि वारणम् । वितर्कः संभावनाप्रत्ययः । नूनं (शूरत् ?) शरत्पुल्ला हि काशाः ॥

कच्चित् कच्चन इष्टप्रश्ने ॥ १६ ॥

कच्चिज्जीवति मे माता । स्नासि कच्चन जाह्नवीम् ॥

हन्त वाक्यारंभनिश्चयखेदसंप्रदानेषु ॥ १७ ॥

वाक्यारम्भे— हन्त ते कथयिष्यामि । निश्चये— हन्त जीविताः स्मः । खेदे— हन्त ताः पथिकगेहिन्यः । संप्रदाने— व्ययमिदं मनुष्येभ्यो हन्त ॥

वा अवधारणे ॥ १८ ॥

अशरीरं वावसन्तं प्रियाप्रिये न स्पृशतः । अशरीरमेव सन्तमित्यर्थः ॥

त्वाव त्वै विशेषे ॥ १९ ॥

सर्व इमे विद्वांसः, अयं त्वाव मूर्खः । वर्णानां (विप्रत्वै ?) विप्राः त्वै प्रकृष्यन्ते ॥

वै नियोगागमयोश्च ॥ २० ॥

नियोगे— वेदो वै धर्ममूलम् । आगमे—शतायुर्वै पुरुषः । विशेषे- बृहस्पतिर्वै देवानां पुरोहितः ॥ पूरणेऽप्याहुः । यो वै युवाऽप्यधीयानः ॥

तु हेतुविशेषावधारणन्यावृत्तिषु ॥ २१ ॥

हेतौ— गृह्णीयां वेदं दुर्ज्ञानं तु । दुर्ज्ञानत्वात् कथं गृह्णीयामित्यर्थः । विशेषे— क्षीरान्मांसं तु पुष्टिकृत् । अवधारणे— दुर्योधनस्तु कुरूणां पापः ।

व्यावृत्तौ— अहं भुञ्जामि (?) त्वं तु किं करिष्यसि ॥ पूरणेऽप्याहुः । आख्यास्यामि तु ते तत्त्वम् । अयं तु वै मूर्ख इति । द्वौ स्वार्थे ॥

नु न्वै स्विद्वितर्के ॥ २२ ॥

को नु धावति । को न्वै राजा को न्वै मन्त्री । अधः स्विदासीदुपरि-स्विदासीत् । कः स्विदेकाकी चरतीति प्रश्ने वितर्कोऽस्त्येव । अहिर्नुकिं रज्जुर्नु किमित्यादौ किमनर्थकम् । किंनु वै जृम्भते कलिरिति । द्वौ स्वार्थे ॥

हरे अनादरे ॥ २३ ॥

हते भीष्मे हते द्रोणे किं हरे त्वं करिष्यसि ॥

अथ आत् प्रश्नाधिकारानन्तर्यप्रतिज्ञासमुच्चयेषु ॥ २४ ॥

प्रश्ने— अथ शक्तोऽसि भुवं भोक्तुम् । अथ धावसि पर्वते । विश्व-कर्मा विमना आत् विहायाः । अधिकारे— अथातो धर्मजिज्ञासा । अथ स्नान-विधः । आत् क्रतून् वर्तयिष्यामः । आनन्तर्ये:—स्नातोऽथ भुङ्क्ते । अथ शोद्धुं-प्रवृत्तः । आदिरुद्द्यावापृथिवी अप्रथेताम् । अनन्तरं रोदसी प्रथित इत्यर्थः । इर्नि-रर्थकम् । प्रतिज्ञायाम्— गौडो भवानथेति ब्रूमः । बाढं गौडोऽसीत्यर्थः । युध्ये-ऽथ योधैः । आत् सोऽस्मि काश्यपः सोद्यमः । समुच्चये — भीमोऽथार्जुनः । दुर्योधनोऽथ राधेयः । अङ्गिरादुपमन्युरात् । ऋतौ व्यवेयादथाऽनृतौ पर्ववर्ज-मिति विकल्पः समुच्चय एव ।

अथो प्रकृत्यधिक्रियास्थापनान्वादेशेषु ॥ २५ ॥

प्रकृतौ — अथो यदुत्सृष्टमस्ति तद्दास्यति । अधिक्रियायाम्— अथो परोक्षं कुर्यात् । समुच्चयेऽप्यधिक्रियागर्भत्वात् । अथो खल्वाहुः । आहुश्चेत्यर्थः । स्था-पने— अथो वर्णानां संस्कारः । अन्वादेशे— अमुं वेदमध्यापय अथो एवं शिक्षामध्यापय । अथोकथितं नु कथमन्वादेश इति पक्षान्तरेऽपि सिद्धम् । (?) नदीषु स्नायादथो देवखातेषु ।

अलं भूषणपर्याप्तिवारणेषु ॥ २६ ॥

अलंकृत्य । भूषणे । अलं मल्लो मल्लाय । पर्याप्तौ । अलमतिप्रसङ्गेन । निषेधो वारणमेव । आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् । अस्यालापस्य वारणं भवत्वित्यर्थः । अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा ॥

चिच्चन असाकल्योपमानासम्मतिषु ॥ २७ ॥

असाकल्ये — किंचिद्भूते । किंचन याति । उपमायाम् — अग्निश्चिद्भवान् । अग्निरिव देदीप्यत इत्यर्थः । असम्मतौ — कुलमाषांश्चिदाहर, बुसंचनाहर । न युक्तमेतदित्यर्थः । असाकल्ये प्रायः किंवृत्तात् परौ । कदाचित् । कथंचित् । कर्हिचित् । कचित् । कुतश्चित् । एवं कदाचनादिषु विस्मयादिप्रतीतिः । समुदायाद्विस्मयादिप्रतीतिः । याचिता नैव कुप्यन्ति पुरुषाः केचनैव ते ॥

हि स्फुटार्थहेत्वोः ॥ २८ ॥

स्फुटार्थे — कोह्यबालिशो हस्तगतं पदगतं कुर्यात् । हेतौ — अग्निरत्राऽस्ति, धूमो हि दृश्यते ॥ पूरणे प्रत्युक्तौचाहुः । या हि दीर्घमिताक्षस्य । अकार्षं हि ॥

हिं स्तो त्रे (भे ?) ॥ २९ ॥

स्तो(तो ?)भो विवेकस्याविवर्णस्य चानन्तरम् । (?) नवा अहिंकृत्य सामगीयते । हिंकारः ॥

हू निन्दादौ ॥ ३० ॥

हू [1] शो (श्या ?) च्या जनतानिन्दा । आह्वानेऽपि । हूहू नायात यातनाम् ॥

हं असम्मतौ ॥ ३१ ॥

हं क एवमाह ॥

---

1. ' हू शोश्याजनतानिन्दाह्वानेऽपि हूहू नायात यातनाम् ' इति एकाकारेण मातृकायां पंक्तिर्विद्यते ॥

हुं स्मृतिभ्रकुटिभयविकार (णं?) भर्त्सनेषु ॥ ३२ ॥

स्मृतौः— हुं सत्यं चैत्रः । भ्रुकुट्या क्रोधः सूच्यते । हुं हन्मि त्वाम् । हुङ्कारः । भये— हुं राक्षसोऽयम् । विक्रा(रणे?)रे— हुं हुं मुञ्च । भर्त्सने— हुं निर्लज्ज ।

हो प्रतिवाक्ये ॥ ३३ ॥

हो किं करवाणि ॥

अहो अहह बत खेदाद्भुतयोः ॥ ३४ ॥

खेदे— अहो प्रमादः । अहह महापातकिन् । अहहो इत्यप्याहुः । अहहो चक्षुः कृतघ्नं कियत् । बत सीता हृता बलात । अहो बत महत् कष्टमिति प्रकर्षसमुदायः । अहो बतासि स्पृहणीयवीर्यः । अद्भुते— अहो आश्चर्यम् । अहह प्रज्ञा सताम् । चित्रं हृद्यं(नं?)नमत बत । अनुकम्पासंतोषौ खेदाद्भुतावेव । बत निन्द्योऽसि । बत जीवामः ॥

ही भर्त्सने च ॥ ३५ ॥

भर्त्सने— ही जाल्म । खेदे—ही नविद्मो जडा वयम् । अद्भुते—हतविधिलसितानां ही विचित्रो विपाकः । प्रीतिरद्भुतमेव । ही ही जितं मया । हीहीभोः इति प्राकृते निपातसमुदायः ॥

हा शोकखेदनिन्दासंभ्रमेषु ॥ ३६ ॥

शोके— हा प्रिये ! जनकराजपुत्रि । खेदे— स्फुरदुरुहारमणीनां हा रमणीनां गतः कालः । निन्दायाम्— हा श्रोत्रियानहृदयान् । संभ्रमे— हाहा किं पुरोधाः । विस्मयेऽस्य प्रयोगो दुरुपपादः । आमन्त्रणे शोकगर्भत्वात् सिद्धम् ॥

ओं प्रारम्भाङ्गीकारान्तब्रह्मसु ॥ ३७ ॥

प्रारम्भे— ओं अग्निमीडे पुरोहितम् । अङ्गीकारे— ओमित्युक्तवतोऽथ शार्ङ्गिण इति । अनुज्ञाऽङ्गीकार एव । अम्भो करवाणि । ओं कुरु । अन्ते—

ब्रह्म भूर्भुवः स्वरोम्। तूष्णींभावोऽन्त एव। कद्वदों कुरु। ब्रह्मणि—अव्ययम्—ओमित्येकाक्षरं ब्रह्म ॥

हंहो हे है हये हरे भो आह्वाने ॥ ३८ ॥

हंहो भीम। हे चैत्र। है (वाडुले?) हये जाये मनसा तिष्ठ घोरे। हरे साहसिन्। भो भो भार्गव (गार्ग्य गालयते?) खेदस्तादावप्यामन्त्रणगर्भत्वात्। श्रान्तोस्मि भोः। सोऽहं भो भुवि भार्गवः।

अरे सावक्षेपे आमन्त्रणे ॥ ३९ ॥

अरे महाराजं प्रति कुतः क्षत्रियाः। अरे इत्यार्याः ॥

रे अरे अवे हीनानाम् ॥ ४० ॥

रे चौर। अरे चेट। अवे वृषल। "हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति" इति नाट्योक्तौ ॥

भगो अघो पूज्ययायिनोः ॥ ४१ ॥

भगो इन्द्र। अघो चौर।

अङ्गेष्टाह्वानपुनरर्थयोः ॥ ४२ ॥

इष्टाह्वाने—अङ्गानङ्ग!। पुनरर्थे—मूर्खोऽपि नावमन्तव्यः किमङ्ग-विद्वान् ॥

अयि प्रणयकोपे ॥ ४३ ॥

आह्वान इत्येव। अयि! विजहीहि दृढोपगूहनम्। अय्ययि साहस-कारिणि।

हा शोकोपाधिके ॥ ४४ ॥

हा मातः। आह्वानमाहुः ॥

अये स्मृतिक्रोधखेदसंभ्रमेषु ॥ ४५ ॥

स्मृतौ—अये रामो दाशरथिः । क्रोधे—अये कोऽयम् । खेदे—अये श्रान्ताः स्मः । संभ्रमे— अये धवत धावत ॥

आहो वितर्के ॥ ४६ ॥

स्थाणुराहो पुरुषः ॥

उत प्रश्नवाक्यार्थसमुच्चयेषु ॥ ४७ ॥

प्रश्ने— उत दण्डः पतिष्यति । वाक्यार्थे—अयि त्रुटद्यद्गजदन्तः परिणत उत पर्वतं भिन्द्यात् । समुच्चये— उत भीम उतार्जुनः । चाद्वितर्के—स्थाणुरुत पुरुषः । समुदायोऽपि । उताहो पुरुषः । आहोस्वित् उतस्वित् उताहोस्वित् भवेद्राजानलः परपुरञ्जयः ॥ पूरणेप्याहुः । शुभं कर्म करोम्युत ॥

कूपत् स्तूपत् यूपत् प्रश्नवितर्कप्रशंसासु ॥ ४८ ॥

प्रश्ने — कूपत् पठति । किं पठतीत्यर्थः । वितर्के — स्थाणुः कूपत् पुरुषः । प्रशंसायाम्— कूपद्गायत । एवं द्वावुदाहार्यौ ॥

धिक् गर्हायाम् ॥ ४९ ॥

धिक् तार्किकान् ॥

हाधिक् खेदे ॥ ५० ॥

हाधिक् ! किमिदं वृत्तम् । शोकोऽपि खेद एव ॥

नन्वाक्षेपानुज्ञेच्छाप्रश्नप्रत्युक्तिवाक्यारम्भनिश्चयेषु ॥ ५१ ॥

आक्षेपे — ननु किमागतोऽसि । अनुज्ञेच्छायाम् — ननु अनुजानीहि माम् । प्रश्ने— नन्वध्येष्यसि । काक्वा किमर्थो लभ्यते । प्रत्युक्तौ—अकार्षीः कटं देवदत्त! ननु करोमि भोः । वाक्यारम्भे—नन्वपोहस्तावदुच्यते । निश्चये—नन्वद्य गच्छामः ॥

नु प्रश्नोपमाप्रत्युक्तिवितर्केषु ॥ ५२ ॥

प्रश्ने— को नु वादमीरत्यन्तरिक्षे । उपमायाम्— वृक्षस्य नु ते पुरुहूतवयाः । प्रत्युक्तौ— अकार्षीः कटं चैत्र ? नु करोमि । वितर्के— अहिर्नु रज्जुर्नु ॥

किं प्रश्नाक्षेपातिशयेषदर्थेषु ॥ ५३ ॥

प्रश्ने—किं राजाऽयम् ? आक्षेपे—किं त्वमपि ब्राह्मणः । अतिशये—रम्यं किमपि तत । ईषदर्थे— किमपि नास्ति । स्वल्पमपि नास्तीत्यर्थः । सर्वनामाऽप्ययमस्ति । कः सब्रह्मचार्यस्य = किंब्रह्मचारी । कुत्सितो गौः = किंगौः । यो न वहति । "किमः क्षेप" इति समासान्तत्वाऽभावः । कामप्यभिरूप्याम् । कुत्सितो नरः = किंनरः ॥

किमु संभावनाविमर्शयोः ॥ ५४ ॥

संभावनायाम्— शूरोऽर्जुनः किमु जेष्यत्यरीन् । विमर्शे— किमु गच्छामि किमु तिष्ठामि ॥

कद्भर्षे ॥ ५५ ॥

कद् रुद्राय प्रचेतसे ॥

अत आतो यत्तद्धेतौ ॥ ५६ ॥

विप्रोऽतः पूज्यः । **आतस्ते** द्यावापृथिव्योर्वीरवादः । **कस्मान्नपूज्यसे** विद्वन् **यत्** सभासु प्रगल्भसे । धृष्टोऽसि **तत्** (करूम ?) करवाम ॥

क्विदभर्त्सने ॥ ५७ ॥

क्वित् कितव ॥ पूरणेऽप्याहु । क्वित् कैतदुपयुज्यते ॥

इवोपमोत्प्रेक्षावक्यालङ्कारेषदर्थेषु ॥ ५८ ॥

उपमायाम् चन्द्र इव मुखम् । निदर्शनमुपमैव । क इव दीनं हन्यात् । उत्प्रेक्षायाम्— लिम्पतीव तमोऽङ्गानि । वाक्यालङ्कारे— कथमिवैतद्भविष्यति । ईषदर्थे— गौर इव ॥

किलागमालीकारुचिहेतूल्लुण्ठनासु ॥ ५९ ॥

आगमे— जघान कंसं किल वासुदेवः । अलीके— गोत्रस्खलितं किलाश्रुत्वा । अरुचौ— एवं किलेह । हेतौ— नकिल कपिरेवमुक्तवान् । उल्लुण्ठनायाम्— त्वं किल योत्स्यसे ॥

खलु निषेधवाक्यालङ्कारजिज्ञासानुनयेषु ॥ ६० ॥

निषेधे— खलु कृत्वा । निषिद्धं करणमित्यर्थः । वाक्यालङ्कारे— अथो खल्वाहुः । जिज्ञासायाम्— स खल्वधीते वेदम् । स किं वेदं पठतीत्यर्थः । अनुनये— नखलु नखलु मुग्धे साहसं कार्यमेवम् ॥ पूरणेऽप्याहुः । अहोनु खलु भोः ॥

नाम प्रकाशालीकामर्शक्रोधकुत्सासंभावनासूयाङ्गीकारेषु ॥ ६१ ॥

प्रकाशे— हिमालयो नाम नगाधिराजः । अलीके— दृष्टेधरे रोदिति नाम तन्वी । आमर्शे— मया नाम स्पृश्यसे । क्रोधे— ममाऽपि नाम दशाननस्य परैः परिभवः । कुत्सायाम्— आस नामायं सवितुरुदयः । संभावनायाम्— कथं नाम समेष्यसि । स्मृतावपि संभावनयैव सिद्ध्यति । स नामायं बन्धुः । सासूयाङ्गीकारे— एवमस्तु नाम । विस्मयेऽप्याहुः । (सान्धो ः) सुन्दो नाम पर्वतमारोक्ष्यति ॥

स्माऽतीते ॥ ६२ ॥

इतिह स्माहुरात्रेयाद्या महर्षयः ॥ पूरणेऽप्याहुः । अङ्ग स्म विद्वन् माणवकमध्यापय ॥

साकं सार्धं समं सत्रा सह सजूरैक्ये ॥ ६३ ॥

पुत्रेण **साकं** याति । **सार्धं** धनैर्महान् । भ्राता **समं** युध्यते । **सत्रा** कलत्रैः पीतः । पुत्रेण **सह** गोमान् । सहैव दशभिः पुत्रैर्भारं वहति गर्दभीति विद्यमानतायामैक्यमस्त्येव । अथ श्रवणयोस्संगो द्विजिह्वैः **सजूरिति** गतिप्रतिरूपको निपातः ॥

अमा समीपे च ॥ ६४ ॥

अमा भवत्यमात्यः । ऐक्ये—सह भूत्वाऽसनममासनम् । **सह** वसत-श्चन्द्रार्कावस्याममावस्या । पुत्रेणामा ॥

आङ् मर्यादाभिविधीषदर्थे ॥ ६५ ॥

मर्यादायाम्— आ उदकान्तात् प्रियमनुव्रजेत् । अभिविधौ— आ-पाटलिपुत्रात् वृष्टो देवः । विना तेनेति मर्यादा । सह तेनेत्यभिविधिः । ईष-दर्थेऽव्ययम् । आ उष्णम् = ओष्णम् । क्रियायोगे उपसर्गः । आयाति ॥

आ वाक्यस्मृत्योः ॥ ६६ ॥

आ एवं नु मन्यसे । पूर्वं नैवममंस्थाः, अद्यतु मन्यसे इत्यर्थः । निपात एकाजनाङिति प्रगृह्यसंज्ञः । स्मृतौ—आ एवं किल तत् ॥ समुच्चयेऽप्याहुः । देवे-भ्यश्च पितृभ्यश्च आ ॥

आम् प्रतिवाक्ये ॥ ६७ ॥

आम् किं ब्रूथ ? ॥

आम परमं बाढं चाङ्गीकारे ॥ ६८ ॥

आम एषोऽस्मि । **परमं** तत्रावासः । **बाढं** प्रीतोऽस्मि । आम गच्छामि । स्मरणेऽप्यङ्गीकारो मूलम् । आम चिरस्य स्मृतम् ॥

आः कोपपीडयोः ॥ ६९ ॥

कोपे—आः रक्षस्तिष्ठ तिष्ठ । पीडायाम्—आः कष्टम् ॥

उश्चिदर्थे ॥ ७० ॥

क उ विप्रः क उ वह्निः ॥

उम् स्मृतौ ॥ ७१ ॥

उमेवमेतत् ॥

ऊम् स्त्रीणां विकारे ॥ ७२ ॥

ऊम् नाहं जाने ॥

इति हेतुप्रकारस्वरूपसमाप्तिविवक्षानियमशब्दप्रादुर्भावैवमर्थेषु ॥ ७३ ॥

हेतौ—हन्तीति पलायते । प्रकारे—गौरश्वो हस्तीति जातिः । स्वरूपे—वृद्धिरित्येव या दृष्टिः । समाप्तौ—अअ इति । विवक्षानियमे—तदस्याऽस्त्यस्मिन्निति मतुप् । इति शब्दात्—'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः । शब्दप्रादुर्भावे—इति पाणिनिः । पाणिनिशब्दः प्रसिद्ध इत्यर्थः । एवमर्थे—क्रमादमुं नारद इत्यबोधि सः । मतेऽपि । एवमर्थत्वात् । इत्यापिशलिः ॥

समुच्चयेऽप्याहुः । गार्ग्यो वात्स्यो भारद्वाज इति ।

([1]दादिवे मुमुचारः । इकमांक्लानर्थकात् । द्रुपकाष्टनिगडाद्यथा मुक्त इत्यर्थः । शिशिरं जीवनाय कम् । शूकं पूजायाम् । एवं सुकं नुकं वितर्के नहिकं निषेधे काटुसारे पिशङ्गला । अनेका पिशङ्गलेत्यर्थः । आक्लावै अग्निमिन्धते । अन्यानपि यथास्थानं वक्ष्यामः । इतिहखलुवै पादपूरणेऽप्याहुः । किमु किमुताहो नहि नखलु यतः । केऽप्येषां वाचकाः केऽपि द्योतकाः केऽप्यनर्थकाः । संभूय स्वार्थमेवैते प्राहुः । यथा इति ह स्माहुः । अरेरे यस्तुवै वेत्ति शास्त्रार्थम् । नूवा । अर्थान्तरं परे । तद्यथा—किंतु किमुत किंपुनः किमङ्ग विशेषे । किंतु मत्ता-

---

1. ( ) एतच्चिह्नमध्यगतो ग्रन्थः संकीर्णः अर्थसङ्गतिशून्यश्च वर्तते । अवश्यमत्र ग्रन्थपातः संभूतः स्यात् । मातृकान्तराऽलाभाच्च संवादस्याऽप्यवकाशो नाऽलभ्यत । उपलब्धमातृकातः यथास्थितमत्रोल्लिखितम् । यथाकथञ्चिद्यथामति अभ्यूह्य सपरिष्कारं विनिवेशितेसति ग्रन्थपातसहितो भाग एवं विद्येत— 'इत्कमांक्ला अनर्थकाः । इत्—द्रुपदादिवेन्मुमुचानः । द्रुपदात् = निगडाद्यथा मुक्त इत्यर्थः । कम्—शिशिरं जीवनाय कम् । ईम्—(उदाहरणमपेक्षितम् ।) क्लाः—आक्लावै अग्निमिन्धते । (?) शूकं पूजायाम् । (उदाहरणमपेक्षितम्) एवं सुकम् । नुकं वितर्के । (उदा ...) नहिकं निषेधे । (उदा ...) काटुसारे । (उदा...) ... ... पिशङ्गला । अनेका पिशङ्गलेत्यर्थः । 'अन्यानपि यथास्थानं वक्ष्यामः । ' इत्यादि यथास्थितमेव द्रष्टव्यम् ।

परं तु अत्रापि सांकर्यं परिष्कारासाध्यत्वं च दृश्यत एव । 'केऽप्येषां-' इत्यादिश्लोकः असंपूर्णो विद्यते । 'नूवा' । इदं किमिति न ज्ञायते । 'अर्थान्तरं परे । तद्यथा' एतदनन्तरं ग्रन्थपात इव ॥

अनापाङ्गभङ्गलोलं हि जीवितम् । प्राकृतोऽपि नावमन्तव्यः किमुत राजा । किंपुनर्ब्रह्मयोनेर्यः स्वभावाद्दाहको बहिः किमङ्ग पवनेरितः ॥)

नहवै निष्ठितनिषेधावधारणे ॥ ७४ ॥

नहवै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति । अवश्यं नास्त्येवेत्यर्थः ॥

नवै निषेधावधारणविशेषनिषेधयोः ॥ ७५ ॥

निषेधावधारणे - नवै वेश्यासु स्नेहोऽस्ति । विशेषनिषेधे—नवै त एतत् प्रियमनेन नेष्यसि ॥

अथकिं मते ॥ ७६ ॥

अपि ब्रह्मणोऽसि ।? अथ किम् । बाढमित्यर्थः ॥

एवमेव सामान्ये च ॥ ७७ ॥

सामान्ये—एवमेव नहि जीव्यते, खलात् कापुनर्भवति कथा । मते—एवमेवैतत् । कः संदेहः ? एवमेव गतः, एवमेवागत इति वृथार्थेऽप्याहुः ॥

यदिनाम यदिपरं प्रकृत्यान्यथात्वे ॥ ७८ ॥

विप्रोसि यदिनाम मूर्खः । यदिपरं प्रेमा समाप्तोत्सवम् । यदिनाम कुले जन्मेति द्वौ स्वार्थे ॥

यदुत वाक्यार्थनिर्देशे ॥ ७९ ॥

वाच्योऽसौ यदुत ग्रामं गच्छ ॥

प्रत्युताऽतोऽन्यथात्वे ॥ ८० ॥

घृतमिव गतपद्याः प्रत्युतातङ्ककारि ॥

यथाकथञ्चिद्यथाकथाचानादरे ॥ ८१ ॥

यथाकथञ्चिद्दत्वा गां दाता स्वर्गे महीयते । यथाकथाच दीयते । यथाकथाच भिक्षा नप्राप्ता । यथाकथाच हस्ताभ्याम् .... यतौ ॥

इतिह प्रवादे ॥ ८२ ॥

इतिहाऽकरोत् । इतिह साहुः ॥

मातावन्निषेधानिश्चययोः ॥ ८३ ॥

निषेधे— मातावद्वद । अनिश्चये— मातावद्भुङ्क्ष्व । "मातावद्भोः" इत्यमर्शो निषेध एव ॥

कथंचित् कृच्छ्रे ॥ ८४ ॥

कथञ्चिदासाद्य महेश्वरस्य दास्यम् ॥

अथवा यदिवा यद्वा पक्षान्तरे ॥ ८५ ॥

कटं कुरु **अथवा** ग्रामं गच्छ । **यदिवा** ग्रामं गच्छ । एवं यद्वा ॥

अपिच किंचान्यच्च समुच्चये ॥ ८६ ॥

विप्रोऽयम**पिच** विद्वान् । **किंच** त्वद्गुणवागुराभिरभितः । **अन्यच्च** श्रूयताम् ॥

ननुच क्षेपे ॥ ८७ ॥

नित्यः शब्दः । ननुच कः शब्दः ? स्फोटो वर्णो वा ?

(यश्च ?) यच्च यत्नानवकल्प्यमर्ष (हर्षा ?) गर्हाश्चर्येषु ॥ ८८ ॥

नावकल्पयामि नमर्षयामि गर्हे आश्चर्यं **यच्च** (यश्च ?) तत्रभवान् वृषलं याजयेत् ॥

किंकिल क्रोधाश्रद्धयोः ॥ ८९ ॥

नमर्षयामि श्रद्दधे **किंकिल** शूद्रोऽध्येष्यते ॥

ईही भर्त्सने ॥ ९० ॥

ईही मूर्ख ॥

कदाचिदपूर्वाशङ्कयोः ॥ ९१ ॥

अपूर्वे— कदाचिद्भुव उत्पातः । आशङ्कायाम्— कदाचित् प्राप्तः स्यात् ॥

अहोनुखलु (हो ?) आश्चर्ये ॥ ९२ ॥

व्यस्तालङ्कृतिरप्यहोनुखलु ते तल्लंघितप्रक्रिया, चेतः सूक्तिनितम्बिनी, मदभरादाघूर्णितं कर्षति ॥

नोचेन्नचेदन्यथार्थे ॥ ९३ ॥

नोचेद्धर्मभियातु जन्तुवनितानेत्रप्रणालीगलद्बाष्पाम्भः परिपूरितोभयतटा द्राग् वर्त्स्यतीरावती ॥ साहसाद्विरम (ते?)ति, तस्मा**न्नचेन्**मृत्युभावाप्स्य (सि?) ति ॥

उपसर्गप्रतिरूपकाः ॥ ९४ ॥

निपाता इत्येव । अदत्त उपसर्गत्वेच उपसर्गान्तइति तत्त्वं स्यात । (?) यथा (च?) म्वंच प्रत्ययसमासौ नस्यातास् । प्रकटः । प्रतराम् । पराकः । परागः । अपाङ्गः । अपसव्यम् । अपहस्तः । संकटः । संमुखः । संप्रति । अनुकः । अनुकूलम् । अवदत्तः । अवकुठारः । अवटीटः । अवनासिका । निर्मुखः । निष्ठयः । निर्मक्षिकम् । दुष्कूलः । दुर्भिक्षम् । दुर्यवनम् । विकटः । विशालः । विशङ्कटः । आकडरः । (?) आलवणम् । नितराम् । निष्कामम् । निशीतम् । अधिपतिः । अधीनः । अधित्यका । अधि आस्ते । (?) अपि कुर्यात् । अपि कुशलम् । अकिंचनोऽपीश्वरः । अतिकायम् । अतितराम् । अति (तैपकम्?) आच्छादनम् । सुतराम् । सुभगः । सुमद्रः । उत्कटः । उत्कः । उत्तमः । अभितः । अभिकः । अभिमन्युः । प्रतिकूलम् । प्रतिभटः । शाकस्य मात्रा = शाकप्रति । अक्षपरि । परितः । परिमुखम् । उपेन्द्रः । उपत्यका । उपकुम्भम् ॥

विभक्तिप्रतिरूपकाः ॥ ९५ ॥

अधिक्रियन्ते ॥

अग्रे हेतौ रात्रौ वेलायां मात्रायां परस्पराद्याः स्वार्थे ॥ ९६ ॥

एते स्वार्थे । अग्राद्यर्थे । विभक्त्यर्थस्तु क्वचिद्विवक्षितः । **अग्रे**सरः । **अग्रे**वनम् । **हेतौ** हन्यति । **रात्रौ** चरः । **रात्रौ** नृत्तंतु द्रक्ष्यसि । **वेलायां** चरः । **मात्रायां** भोजकः । **परस्परस्य** स्पर्धन्ते । **अन्योन्यस्य** पश्यतः । कुत्वात्मा क्वचमेखलेति गलते प्राणस्समानग्रहः । अनत्याधान उरसिमनसी, मध्ये पदे निवचनेच, नित्यं हस्ते पाणावुपयमनइति निर्देशादलुक् । (यथा पारंमध्ये षष्ठ्यावा?) **पारेमध्ये** षष्ठ्या वा । मनसिकृत्य । पारं गङ्गायाः = पारेङ्गम् ॥

ममाहं दर्पे ॥ ९७ ॥

ममकारः । **ममता** । **निर्मम**: । अहं विद्यतेऽस्य = अहंयुः । अहंकारः । **अहमहमिका** ॥

अकस्मादतर्किते ॥ ९८ ॥

कस्मादकस्मादुदितः पिशाचः ॥

अञ्जसा सत्येच ॥ ९९ ॥

सत्ये - अञ्जसा वक्ति धर्मं यज्वाऽञ्जसा याति ब्रह्मलोकम् ॥

स्थाने युक्त ॥ १०० ॥

स्थाने यन्निहतः शत्रुः ॥

शुभं कल्याणे ॥ १०१ ॥

शुभंयुः । शुभंयाः । कल्याणवानित्यर्थः ॥

कृतं वारणे ॥ १०२ ॥

कृतं चापलेन ॥

पर्याप्तं समर्थेच ॥ १०३ ॥

सामर्थ्ये— त्वयैव किं न **पर्याप्तम्** ? । वारणे - **पर्याप्तं** साहसेन ॥

ते मे टार्थे ॥ १०४ ॥

श्रुतं **ते** राजशार्दूल । श्रुतं **मे** भरतर्षभ । त्वया श्रुतेत्यर्थः ॥

येन तेन लक्षणहेत्वोः ॥ १०५ ॥

नदीं **तेन** गतः । गिरिं **येन** ययौ । नदीं गिरिं च लक्ष्यीकृत्येत्यर्थः । हेतौ— **येन** दाता **तेन** श्लाघ्यः ॥

अन्ततः शासनावयवसंभावनयोः ॥ १०६ ॥

शासनावयवे— (किंविदधा ?) अन्ततः प्रजां प्राप्स्यति । संभावनायाम्— **अन्ततः** शतं दास्यति ॥

तत आद्यानन्तरयथान्तरेषु ॥ १०७ ॥

आद्ये— ततः प्रववृते सर्गः । अनन्तरे— अन्नं भुङ्क्ते ततः शेते । यथान्तरे— ततस्ततः ॥

कुतः प्रश्ननिह्नवयोः ॥ १०८ ॥

प्रश्ने— कुतस्त्यः ? निह्नवे— कुतो मे भार्या ॥

यथा योग्यतावीप्सापदार्थानतिवृत्तिसादृश्येषु ॥ १०९ ॥

योग्यतायाम्— श्रुते योग्या = यथाश्रुतमस्य दक्षिणा । वीप्सायाम्— येये वृद्धाः = यथावृद्धं ब्राह्मणानामन्वयम्च । पदार्थानतिवृत्तौ—शक्तिमनतिक्रम्य = यथाशक्ति वक्ति । सादृश्ये— लक्ष्मीर्यथेयम् । अनुमाने प्रकारेण सिद्धम् । चौरोऽयं यथाऽस्य श्लिष्टे भ्रुवौ ॥

तथा समुच्चयाङ्गीकारनिदर्शनसादृश्येषु ॥ ११० ॥

समुच्चये— हारीतोऽयमहं तथा । अङ्गीकारे— स तथेति प्रतिज्ञाय । निदर्शने— तथाहि ते शीलमुदारदर्शने । सादृश्ये— अयमपि तथा । सत्ये प्रकारेच । **तत्तथा** न तदन्यथा । **तथ्यं** वितथ्यम् ॥

द्वावुद्दे (श्य ? श्र निर्दे (श्यौ ?) शौपम्यकारणोपपत्तिषु ॥ १११ ॥

उद्देशे— यथाऽर्कस्तथा तेजः । निर्देशे— यथातथा (सं ?) सान्त्वयित्वा वश्यः स्त्रीणां तथा तथा । औपम्ये— यथा अर्कस्तथा कर्णः । कारणोपपत्तौ— यथा विनीतस्तथा पण्डितोऽयम् ॥

कथं प्रश्नसंभ्रमासंभवेषु ॥ ११२ ॥

प्रश्ने— कथमजीर्णम् ? संभ्रमे— कथं हतः कर्णः ! असंभवे— कथं भीतो योत्स्यते । हर्षेऽप्याहुः । कथं वत्सो मे रामभद्रः ॥

तदा आरम्भे ॥ ११३ ॥

तदाप्रभृति निस्सङ्गः ॥

यदा हेतौ च ॥ ११४ ॥

यदा बुधः सर्वगतस्त्वमुच्यसे । यदा मूर्खस्तदा शठः ॥

तर्हि हेतुविशेषयोः ॥ ११५ ॥

हेतौ— तर्हि ग्रामं गच्छति । विशेषे— अर्जुनस्तर्हि शूरतमः । पक्षान्तरं हेतुरेव । यद्येवं तर्हि गच्छामः ॥

यावद्धृतुसीम्नोः ॥ ११६ ॥

हेतौ— यावद्भवत्याहिंसायकस्य । मर्यादायाम् (सीमनि)— यावत् पुरं वृष्टो देवः । यावद्धिरण्यं वै मरुतां चरन्ति । अधिकारः सीमैव । यावत् संभवस्तावद्विधिः । साकल्येऽवधारणे च । यावद्दत्तं तावद्भुक्तम् । यावज्जीवमग्निहोत्रं जुहुयात् । यावन्त्यमत्राणि संभवन्ति यावदमत्रं ब्राह्मणान् भोजय ॥

यावताच पक्षान्तरे ॥ ११७ ॥

ज्ञाने सतीभावान्यावता नगतः । (?) जानेऽन्यायं यावत्स एव ॥ (?)

तावत् संप्रत्यवध्यल्पेषु ॥ ११८ ॥

संप्रति— आस्तां तावत् । अवधौ— वध्यसे तावत्, तावच्छृणु । अल्पे— तावन्मात्रम् ॥

अस्ति सत्त्वे ॥ ११९ ॥

अस्तिक्षीरा ब्राह्मणी । अस्तिमांश्चैत्रः । अस्ति परलोके मतिरस्याऽस्तिकः । अस्त्यत्र कंचित् पश्यसि विद्वांसम् ॥

नास्ति प्रत्यनीके ॥ १२० ॥

नास्तिकः । नास्ति जीयते रामः । नास्ति वा दरशून्यः ॥

अस्यस्मि त्वमहमर्थे ॥ १२१ ॥

बाल्यादस्मित्वमस्यासि चन्द्रग्रहणे न विना नास्मि रमे अस्मिता । (?)

विद्यते भवत्यस्त्यर्थे ॥ १२२ ॥

विद्यते नाम तत्भवान् वृषलं वा (यजिष्यति । ?) याजयिष्यति । भवति नाम ॥

एहि प्रहासे ॥ १२३ ॥

एहि मन्ये रथेन यास्यसि यातस्ते भ्राता । एहि न त्वया वक्ष्ये । (!)

ब्रूहि प्रैषादौ ॥ १२४ ॥

अग्नयेऽनुब्रूहि । [1] (तङिति तिङ्इति निपाते भ्रस्याच्छङ्के भ्राः वितर्के स्यात् । अस्ति स्यान्नास्ति स्याद्वादः । शङ्के रात्रौ प्रयास्यति । मन्ये मूर्खोऽयम् । जानाम्यशेषसुररूपधरस्त्वमेकः॥)

अस्तु भवतु पूर्यते (वारुणे ?) वारणे ॥ १२५ ॥

अस्तु सान्ना । अस्तुङ्कारः । भवतु भक्त्या । पूर्यते प्राणायामेन ॥

आसाऽह विदर्थे ॥ १२६ ॥

लावण्य उत्पाद्य इवाऽस्य यत्नः । अथाऽह वर्णी विदितो महेश्वरः ॥

वर्तते संवरणे ॥ १२७ ॥

धन्यास्ते (नविलङ्घयेन ?) नविलङ्घनीयचरिताः तिष्ठन्तु हुं वर्तते ॥
(वृद्धास्ते नक्विचारणीयचरिताः । ?)

नवर्तेऽनुचिते ॥ १२८ ॥

नवर्तते साराभिऽमुखे पत्यावश्रुपातः ॥

याति गच्छति शक्ते ॥ १२९ ॥

इदं मे यातुं गच्छति । गर्तुं ? गन्तुं शक्यमित्यर्थः । नेतुं नाभिरिता नयाति किं विदिशं भक्तुं गच्छति ॥ (?)

पश्य पश्यत आश्चर्ये ॥ १३० ॥

पश्य बालोऽपि विद्वान् । पश्यत मूर्खा विजृम्भन्ते ॥

---

1. ( ) एवं चिह्नितो भागः सङ्गतिरहितो भाति । अत्राऽपि मन्थपातो भवेत् ॥
2. अत्राऽपि अर्थविषये संदेह एव ॥

स्वरप्रतिरूपका अस्वरूपादौ ॥ १३१ ॥

अ अमक (१) । इ इन्द्रं पश्य । ई ईदृक्संसारः । उ उत्तिष्ठ । ऊ ऊर्ध्व-केशिन् । ए इतो भव । ऐ ऐश्वर्यमत्ताः । ओ श्रावय । औ और्व दुर्भरोऽसि ॥

प्रत्ययप्रतिरूपका अपि निपाता दृश्यन्ते । मूर्खइति कृत्वा त्याज्यः । कृत्वा चिन्तेयम् । आपमित्यकम् । प्रसज्य प्रतिषेधः । देवदत्त गामत्याजेतिवत् ॥ (२)

इति निपाताव्ययोपसर्गवृत्तौ (तिलकृतायां)

निपातकाण्डं प्रथमम् ॥

॥ श्रीः ॥

श्रीः

श्रीगुरवे नमः

॥ द्वितीयमव्ययकाण्डम् ॥

सत्ववृत्त्यव्ययम् ॥ १ ॥

प्रायशः सत्ववृत्ति स्वराद्यमव्ययमित्यधिक्रियते । सत्वं द्रव्यं (भेदमिति ?) भेद्यमिति याक्त् । विशेष्यत्वं च जातिगुणक्रियाद्रव्ययदृच्छाशब्दसंबन्धत्वात् । ([1] झः ईक्त् नमः दिवा हुह्नु अन्तः ।) अत एव सर्वविभक्तियो (गः ?) गे स्वारस्यम् । एहि जाये स्वः रोहावः । स्वः संजानीते । स्वः स्पृहयति । स्वः पतितः । छायेव या स्वर्नलघेर्जलेषु । स्वर्वसतिः । रे! स्वस्तृणं मे त्वम् । स्वः सुखे । स्वस्था भवन्तु कुलजासुतास्सभृत्याः ॥

प्रेत्यामुत्रपरत्र च परलोके ॥ २ ॥

अभ्यो धनं प्रेत्यच तस्य भुङ्क्ते । अमुत्र भविता यत्तु तच्चिन्तय शुभाऽशुभम् । अमुत्र भवः = आमुत्रिकः । पारत्रिकः । स्वर्यातस्यद्यपुत्रस्य । (?)

भूर्भुवः स्वर्महर्जनस्तपः सत्य(?)लोकान्तरेषु ॥ ३ ॥

भूर्लोकः । भुवोऽन्तरिक्षम् । ओं महत् — महर्लोकः । महदादितश्च कार्यमिति भ्रान्त्या प्रयोगः । ओं जनः । ओं तपः । ओं सत्यम् ॥

अन्तर्मध्ये ॥ ४ ॥

भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् । (?) अभ्यन्तरं मध्यमेव । अन्तर्यामी ॥

बहिर्बाह्ये ॥ ५ ॥

बहिर्ग्रामात् । [2] (अन्ते जानोदधिध्वं पचतेत सोमं भक्तेंच नोदधिध्वम् .... श्रद्ध्वमित्यर्थः ।)

---

1. ( ) एवं चिह्नितस्य भागस्य संगतिर्न दृश्यते ॥ 2. अस्य संगतिः कथम् ?

जामि भूय आवृत्तौ ॥ ६ ॥

जामयो जामि ज्वलन्तिं । भूयो नैवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितम् ॥

पुनर्विशेषेच ॥ ७ ॥

आवृत्तौ—पुनरुक्तम् । विशेषे—किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥

प्रातः प्रगे प्राह्णे प्रत्यूषे ॥ ८ ॥

प्रातरुत्तिष्ठति । प्रगे प्रबुद्धः । प्राह्णेतनः ॥

वस्तर्दिवाह (?) ॥ ९ ॥

कुहस्विद्दोषा कुह वस्तरश्विना । दिवातनम् । अहरहर्नयमानो गामश्वं पुरुषं पशुम् ॥

सायं दिनान्ते ॥ १० ॥

सायंतनी सन्ध्या ॥

दोषा नक्तमुषा रात्रौ ॥ ११ ॥

दोषा महान्। (?) नक्तं चरः। उषातनो वायुः ॥

ह्योऽतीते ॥ १२ ॥

असह्यो ह्योऽभवद्वायुः । ह्यस्तनम् ॥

श्वोऽनागते ॥ १३ ॥

श्वो गन्ता ग्रामम् । श्वस्तनम् ॥

परश्वः श्वःपरेऽह्नि ॥ १४ ॥

परश्वो गन्ता । "तृतीयेऽह्नि" इत्यर्थः ॥

संवद्वर्षे ॥ १५ ॥

संवत्तृतीये ॥

अस्तं समुत्रा नुत (?) ॥ १६ ॥

अस्तं समयः । समुत्रा वास्तव इन्द्रो अस्मे अराश्चिद्द्वेषः । (?) सुनुत पर्युप ॥

कं मूर्धाम्बुसुखनिन्दासु ॥ १७ ॥

मूर्ध्नि—कंजः केशः । अम्बुनि—कंजं पद्मम् । सुखे—विद्यतेस्या कम् । (?) (विद्यतेऽस्य कम् । ?)[1]

शं सुखे ॥ १८ ॥[2]

शं योरभिस्रवन्तु नः । आपो नः सुखमभिस्रवन्त्वित्यर्थः । नमः शंकराय च मयस्कराय च ॥

पुरा भूतविप्रकर्षभविष्यदासन्न्योः ॥ १९ ॥

भूतविप्रकर्षे—पुराऽपि वनम् । पुराणम् । पुरातनः । भविष्यदासन्नौ —गच्छ पुरा देवो वर्षति ॥

विहायसाऽऽकाशे ॥ २० ॥

विहायसा रम्यतरं विभाति ॥

रोदसी दिवस्पृथिव्योः ॥ २१ ॥

रोदस्यौ रोदसी ॥

अम्नः सद्यःशीघ्रयोः ॥ २२ ॥

समानेऽह्नि—अम्नः शौचानि कारयेत । शीघ्रे—अम्नोऽवगच्छ ॥

निकषा सामीप्ये ॥ २३ ॥

लङ्कां निकषा ॥

समया मध्येच ॥ २४ ॥

समया ग्रामम् । मध्ये समीपेवेत्यर्थः ॥

असांप्रतमयुक्ते ॥ २५ ॥

स्वयं छेत्तुमसांप्रतम् ॥

---

1. ( ) एवं चिह्नितः पाठः साधुर्भवेदिति लिखितः ॥ एतदनन्तरं निन्दायामुदाहरणं देयम् । परंतु मातृकायां नाऽस्ति ॥ 2. मातृकायां सूत्ररूपं मूलं नास्ति । उदाहरणे वर्तते । तदनुरोधेन मूलं प्रकल्प्य लिखितम् ॥

सत्यमद्धा ऋधक् सत्ये ॥ २६ ॥

सत्यं मनोरमाः (वामाः ?) रामाः । अद्धा मनुरस्य विभोः । अरे अनद्धा पुरुष ऋधग्वादी । अङ्गीकारेऽपि सत्यत्वादेव । सत्यमसारः संसारः ॥

मिथ्या मृषा विस्रसाऽनृते ॥ २७ ॥

मिथ्यावादी । मृषोद्यम् । विस्रसैतत् ॥

मुधा वृथा विफले ॥ २८ ॥

मुग्धे मुधा ताम्यसि । वृथा दुग्धोऽनड्वान् ॥

इद्धा प्राकाश्ये ॥ २९ ॥

समिद्धमिद्धा समहो दधासि ॥

अर्वाक् प्राक् पूर्वे ॥ ३० ॥

वर्षात् षोडशा (माः) त् अर्वाक् । प्राग्ग्रामात् ॥

पश्चपश्चाच्चरममन्वावर्याऽनग्रयोः ॥ ३१ ॥

आवर्ये—पश्चार्धम् । पश्चिमम् । पश्चादस्ताद्रिः । पूर्वमयशः स्फुरति चरममधरः । मुनिं काणादमन्वतः । अनग्रे—पश्चाद्ययी । अनुचरः ॥

मिथोऽन्योन्यम् ॥ ३२ ॥

मिथस्त्वदाभाषणलोलुपं मनः ॥

रहोऽप्रकाशे ॥ ३३ ॥

[1] रहो संत्रयते । अनव्ययमप्यस्ति । रहसि भवम् = रहस्यम् ॥

द्वन्द्वं मिथुर्मिथु (नेः) नं (द्वौद्वावर्थेः) ॥ ३४ ॥

द्वन्द्वं मन्त्रयन्ते । मिथुः क्रीडन्ति कामिनः । मिथुनं धावन्ति विद्याधराः ॥

यथायथं यथास्त्रम् ॥ ३५ ॥

गतास्सर्वे यथायथम् ॥

---

1. रहः संत्रायते इति भवेदिव ॥

परोवरंप रस्परं क्रमे ॥ ३६ ॥

परंचावरंच = परोवरमनुभवति = परोवरीणः । परंच परतरंच । परस्पर-मनुभवति ॥ परस्परीणः ॥

सम्यक् तत्त्वेष्टयोः ॥ ३७ ॥

तत्त्वे—सम्यगाह । इष्टे— सम्यक् कृतम् ॥

सकृत् सदैकवारयोः ॥ ३८ ॥

सदार्थे—सकृद्युवानो गीर्वाणाः । एकवारे—सकृदंशं निपतति ॥

ताजग् जोषग् झडिति तरसा स्राग् द्राङ्मङ्क्ष्वाश्वरं शैघ्र्ये ॥ ३९ ॥

ताजग् (याधि?) याहि । जोषग् यात । कगिति कुचतटादं नमो मन्मथाय । (?) झडिति घटयति विधिरभिमतमभिमुखीभूतः । तरसोदितास (जमलेषु?) स्राक् सरन्त्यभिसारिकाः । द्राग् विद्युतं कातरैः । मङ्क्षूदपादि परितः पटलैः । आश्वपेहि मम शीधुभाजनात् । [1]अरेरे, सर, अजिरं, मृधं चाहुः । तूर्णं द्रुतं क्षिप्रं शीघ्रं लघिति क्रियाविशेषणम् ॥

ऊर्ध्वमुपर्युपरिष्टादूर्ध्वे ॥ ४० ॥

ऊर्ध्वं प्राणाह्युत्क्रमन्ति । नीचैर्गच्छत्युपरिच दशा । उपरिष्टान् प्रतिष्ठन्ते ॥

उच्चैरुच्चे ॥ ४१ ॥

उच्चैरुच्चरतु चिरम् ॥

नीचैरवाङधोऽधस्तान्न्यङ् नीचे ॥ ४२ ॥

नीचैः शंस । अवाङ्मुखः । अधोगङ्गा । अधस्तादद्रेः । न्यक्कृतः ॥

अवश्यं नियमे ॥ ४३ ॥

अवश्यं यातारश्चिरतरमुषित्वाऽपि विषयाः ॥

साम्यर्धे ॥ ४४ ॥

सामि सम्मीलिताक्षी ॥

---

1. मातृकायां आन्ध्रलिप्यां अत्र ह्रस्वैकारघटितलेखनं विद्यते ॥

साचि तिर्यगर्थे ॥ ४५ ॥

साचिलोचनयमं (?) नमयन्ती ॥

अन्वगानुषगानुकूल्ये ॥ ४६ ॥

अन्वगास्ते । तृणन्ति बर्हिरानुषक् । आनुकूल्येन दर्भैः छादयन्तीत्यर्थः ॥

प्राध्वं निग्रहे च ॥ ४७ ॥

निग्रहे—प्राध्वमज्ञानि साहसात् । निगृहीतान्यज्ञानीत्यर्थः । गतिप्रति-रूपकोऽयम् । आनुकूल्ये—प्राध्वं कुरुध्वं बुधाः ॥

साक्षात् प्रत्यक्षे ॥ ४८ ॥

साक्षात्कृतधर्माणो विबुधाः ॥

प्रमीं विषु विष्वक् समन्तात् समन्ततः परितः सर्वतोऽर्थे ॥ ४९ ॥

प्रमीमादित्योऽसृजत् । सर्वत आदित्योऽसृजदित्यर्थः । विषु अञ्चति-विष्वङ् । विष्वगञ्चति=विष्वद्यङ् । समन्ताद्भवः सामन्तः । समन्ततो धावति । परितः प्रपतन्ति दुष्कृतां विपदः ॥

उभयतोऽभितोऽभिमुखे च ॥ ५० ॥

उभयतो ग्रामं वसति । आयान्तमभितः कान्तम् । सर्वतः संमुखं वेत्यर्थः ॥

मुहुरसकृदभीक्ष्णं पौनःपुन्ये ॥ ५१ ॥

कान्तां मुहुर्ध्यायति । असकृत् समरे जितः । अभीक्ष्णमास्फालयतीभ-कुम्भम् ॥

ज्योग् दीर्घायुष्ट्वे ॥ ५२ ॥

ज्योङ्नदन्तः पूर्णकामाश्चरेम ॥

हिरुग् हिंसायाम् ॥ ५३ ॥

हिरु(र?)गव्रतो हैरुकः ॥

ईषदल्पे ॥ ५४ ॥

ईषच्चौरः ॥

मनागनुशये च ॥ ५५ ॥

अनुशये—मनाङ् न भ्रष्टोऽस्मि । अल्पे—मनाग्वादी ॥

शनैर्मान्द्ये ॥ ५६ ॥

शनैर्याति पिपीलकः ॥

बलात् प्रसह्य बहलं हठे ॥ ५७ ॥

अहो बलात्कारः । प्रसह्यघाती । आर्य! बहलं गृह्णाति । हठात् कण्ठाश्लेषीति हेतौ ङसिः ॥

आराद्दूरान्तिकयोः ॥ ५८ ॥

दूरे—आराद्यातः । अन्तिके—रसं प्रीतां स्थापयेदारात् (?) ॥

प्रायः प्रायेण बाहुल्ये ॥ ५९ ॥

प्रायः प्रत्ययमादत्ते । प्रायेण सामग्र्यविधौ गुणानाम् ॥

युगपदेकपदेप्रबाहुक् तुल्यकाले ॥ ६० ॥

युगपद् ज्ञानानुत्पत्तिर्मनसो लिङ्गम् । अयमेकपदे तया वियोगः । प्रबाहुग् बहवो गताः । तुल्यकालं, समकालं, तत्कालमेककालमिति क्रियाविशेषणम् ॥

सपद्यह्नाय तत्क्षणे ॥ ६१ ॥

सपदि दहत्युपेक्षितो विह्निः । अह्नाय सा नियमजम् ॥

उपांश्वप्रकाशे ॥ ६२ ॥

उपांशु स्याच्छतगुण उपांशुदण्डः ॥

तूष्णीमवाचि ॥ ६३ ॥

तूष्णीमास्ते ॥

जोषं सुखे च ॥ ६४ ॥

सुखे—जोषं जितेन्द्रियः । अवाचि—जोषमुपास्महे ॥

तिरोऽन्तर्धानतिरश्चोः ॥ ६५ ॥

अन्तर्धौ—तिरोभूताः । तिरश्चि—तिरः काष्ठं कुरुष्व ॥

स्वयमात्म(नोऽक्षे ?)नेत्यर्थे ॥ ६६ ॥

स्वयमागतः ॥

कु कुत्साल्पयोः ॥ ६७ ॥

कुत्सितो ब्रह्मा = कुब्रह्मा । ईषदुष्णम् = कोष्णम् ॥

उपष्टु दुष्टु दुष्टे ॥ ६८ ॥

उपष्टुकारी (कोहि पश्यति दुर्जनः?) पिशुनदौष्टवम् ॥

काममनुमतौ ॥ ६९ ॥

कामं क्षाम्यतु यः क्षमी ॥

निकामं प्रकामं सुष्ठु बलवदतीवाऽत्यर्थे ॥ ७० ॥

निकामं क्षामाङ्गी । प्रकाममप्रोयत । सुष्ठु खल्विदमुच्यते । बलवच्छ्रान्तोऽसि । अतीव क्षुत्पिपासितः ॥

सु, शु, वन्व, षाट्, प्याट्, प्रशंसायां च ॥ ७१ ॥

सुमुखम् । शुनासीरः । वन्व हं असि सूर्य (?) षाट् श्रव्यं पठति । प्याट् पार्वती गायतु मङ्गलानि । अत्यर्थे—अभिशुनसखीनाम् (?) शु = प्रशस्तम्—अश्नुते = श्वशुरः । शुनासीरः ॥

वरं हीनोत्कर्षे ॥ ७२ ॥

वरं कूपशताद्वापी ॥

परं केवलं किन्त्वेकार्थे ॥ ७३ ॥

किन्त्वर्थे—भाव्योऽसौ मूर्खः परम् । केवलं कर्मवैचित्र्यात् जानन्नपि विमुह्यति । एकार्थे—धर्मः सखा परमहो परलोकयाने । न केवलं यो महतोऽपभाषते ॥

चिरं चिराय चिररात्राय चिरस्य चिरे ॥ ७४ ॥

चिरंजीवी । चिरन्तनः । चिराय निर्धनो भूत्वा । चिररात्राय यजते । चिरस्य बत लब्धासि । चिराच्चिरेणेति नामनी ॥

तत्त्वं व्यक्तौ ॥ ७५ ॥

तत्त्वं मूर्खोऽयम् । व्यक्तं स्फुटमिति क्रियाविशेषणम् ॥

पुरस्तात् पुरतोऽग्रतोऽग्रे ॥ ७६ ॥

पुरस्तात् सेनानीर्याति । तदेत्यर्कः पुरस्तात् । पुरतस्त्वरितो याति । प्रसरतां यात्यग्रतः केसरी च ॥

पुरः पूजायां च ॥ ७७ ॥

पूजायाम्—पुरस्कृतः । अग्रे—पुरो याति ॥

अच्छाऽभिमुखे ॥ ७८ ॥

अच्छ स्वच्छो भव । अच्छभल्लः । गतिप्रतिरूपकोऽयम् ॥

प्रादुराविः प्रकाशे ॥ ७९ ॥

प्रादुष्प्रभावः । आविष्कृतः । गतिप्रतिरूपकौ चैतौ संभवत एव । प्रादुर्भूतमधोक्षजम् । आविर्भूतः ॥

वरिवः परिचर्यायाम् ॥ ८० ॥

वरिवस्कृणोतु । परिचरात्वित्यर्थः । वरिवस्यति गुरून् ॥

सहसा आकस्मिकाऽविमर्शयोः ॥ ८१ ॥

आकस्मिके—शि(वः?)रः प्रसूनं सहसा पपात । अविमर्शे—सहसा विदधीत न क्रियाम् ॥

शश्वत्, सनत्, सना, नित्यदा, सदिति नित्ये ॥ ८२ ॥

शश्वदकरोत् । सनत् कुमारः । सना श्रवणशीलते सनाशिभिः (?) । सनातनः । राधेयो नित्यदा दाता । सदिति मन्त्रिणः शुचयः । नित्यं सततमजस्र-

मनिशमिति क्रियाविशेषणमनारतादिकम् । एवं युक्तं स्नातुम् । अनन्तरं गतः । निश्चितं मूर्खोऽयम् । भीमस्तरस्वी भृशम् । अत्यर्थं तनुः । साधु दृष्टं यद्दृष्टव्यम् ॥

नमोऽर्चादौ ॥ ८३ ॥

नमो देवेभ्यः । विष्णवे दीपो नमः । दीपं निवेदयामीत्यर्थः ॥

श्रौषड्, वौषड्, वषड्, वड्, ऋषड्, देवेट्, स्वाहा हविर्दाने ॥ ८४ ॥

अस्तु श्रौषट् । हीही वौषट् । वषडिन्द्राय तस्मै स्वाहा । वट् ताभ्यः स्वाहा । (वषड् ऋषड् देवेट् ?) अप्सुषदेवेट् । अग्नये स्वाहा ॥

हन्त भिक्षादाने ॥ ८५ ॥

मनुष्याणां हन्त हन्ततिः । भूरियं हन्तकारः ॥

स्वधा तृप्तौ ॥ ८६ ॥

पितृभ्यः स्वधा । प्रीतिस्तृप्तिफला ॥

स्वस्त्यविनाशे ॥ ८७ ॥

स्वस्ति प्रजाभ्यः ॥

कंबडन्तःकरणे ॥ ८८ ॥

कंबड् शुद्धिः । हलाभ इत्यर्थः । आभिमुख्येऽप्याहुः । कंब(डखो ?) धावति ॥

सपदिविद्रुवमेतर्हिसंप्रतीदानीमधुना सांप्रते ॥ ८९ ॥

सपदि दहत्युपेक्षितो वह्निः । विद्रुतोऽसौ विद्रुवम् । एतर्हि बर्हिणां कालः । संप्रत्यसांप्रतं वक्तुम् । तमधुना मधुनानिति तं हृदि (?) । असंप्रतीति नञ्समासोऽव्ययीभावो वा ॥

धिङ् निन्दाभर्त्सनयोः ॥ ९० ॥

निन्दायाम्—धिक् तार्किकान् । भर्त्सने—धिग् जाल्म ॥

ऋते विनाऽन्यत्र वर्जने ॥ ९१ ॥

ऋते कृशानोर्नहि मन्त्रपूतम् । विना वातं विना वर्षम् । अरोगिभावादन्यत्र ॥

अन्तरेणान्तरा मध्ये च ॥ ९२ ॥

मध्ये—यतो भवन्तमन्तरेणान्यथाऽन्यदा भूपतिर्ग्राहितः । अन्तरा त्वां च मां च कमण्डलुः । वर्जने—अन्तरेण पुरुषकारं न किंचित् सिध्यति । त्वामन्तरा तामृतमनसा यथाक्षि (?) ॥

पृथङ् नाना भेदे च ॥ ९३ ॥

भेदे—पृथग् वादाः । नानारूपा इत्यर्थः । वर्जने—तेभ्यः पृथक् । नाना नारीर्निष्फला लोकयात्राः । स्त्रीर्विनेत्यर्थः । अपृथग्यत्ननिष्पन्न इति नञा ॥

अन्यद्विशेषे ॥ ९४ ॥

चौरो गतः । अन्यत् किमास्ताम् । अन्यच्च (?) ।

कुवित् प्रशंसाभूत्योः ॥ ९५ ॥

प्रशंसायाम्—कुवित् (सुनोग?) इष्टये । भूतौ — कुविदङ्गाय वसन्तः । समृद्धायाङ्गायेत्यर्थः ॥

हडुत्तारणे ॥ ९६ ॥

हुं हट् प्रतिहतोऽसि ॥

अदाश्चर्ये ॥ ९७ ॥

अद्भुतमिदम् । अंदि भुवो डुतच् (उणादिसूत्रमिदम्) ॥

शं प्रतिग्रहे ॥ ९८ ॥

गां शं करोति ॥

स्वरिति प्रीतौ ॥ ९९ ॥

आज्येन तनूनपात् स्वरिति । प्रीयत इत्यर्थः ॥

स्वगा निष्क्रये ॥ १०० ॥

स्वगा सन्त्वृत्विजः । निष्क्रीताः सन्त्वित्यर्थः ॥

जातु खेदामर्षसंभावनानिश्चयकदाचिदर्थे ॥ १०१ ॥

खेदे— न जात्वहं भुञ्जे । अमर्षे — न जात्वस्य सुकृतमस्ति । संभावना-

याम्—शूद्रं को जातु याजयेत् । निश्चये—को जातु युध्यतेऽर्जुनेन । कदाचिदर्थे—न जातु कामः कामानामुपभोगेन शाम्यति ॥ कारणोपदेशेऽपि—अत एव स्वस्थो न जातु बहुभुक् ॥

पुत् कुत्सायाम् ॥ १०२ ॥

पुत् कामः । पुद्गलः । पुगित्येके । (दिष्ट्या वर्धसे?)

मर्यादः सीमबन्धे ॥ १०३ ॥

मर्या दीयते = मर्यादा ॥

आदहारम्भहिंसाकुत्सासु ॥ १०४ ॥

आरम्भे—आदह भक्तस्य भोजनाय । हिंसायाम्—आदहारीन्पुरन्दरः । हिनस्तीत्यर्थः । कुत्सायाम्—ऊर्यादह्यति करिष्यसि । (?)

आदङ्ग निन्दाविनाशयोः ॥ १०५ ॥

निन्दायाम्—भुङ्क्ष्वादङ्ग तृप्तः (?) । विनाशे—आदङ्ग क्षीरं दधिभावाय॥

कूं खुं गुं घुं कीं शीं द्वेषे ॥ १०६ ॥

कूं मूर्ख । कीं (काटप्राणि?) शीं (शाक्यायाम्?)

अनव्ययस्य अव्यय(स्य?)त्वेन भवनमव्ययीभावः । समा (स्यैवा?) स्यैवाव्ययम् । अभावः सूकराणां निःसूकरं वर्तते । समृद्धेर्भिक्षाणां सुभिक्षम् ॥

व्यक्ताऽव्यक्तवर्णपदवाक्यानुकरणम् । पि पि प्रिये! सु सु सुरां मु मु मुखासवं देहि । गवित्ययमाह । क्रोधं प्रभो! संहर संहरेति । अव्यक्तानुकरणम्—चीत् करोति याति च । चटच्चटिति चर्मणि च्छमिति (चौच्छलच्छोणिते?) चोच्चलच्छोणिते ॥

बीजकूटमालामन्त्राः । बीजं चतुष्कादि । कूटो नवात्मादि । मालामन्त्रः कुरुकुल्लाभोरुण्डादिः । शुष्काक्षराण्यपि मालामन्त्रत्वात् । रूं ढुं रूं ढुं दिड्ले दिड्ले जम्बूकवर्जित जगति यति किनिकिचाकू ॥

[1] तोसुन् कसुनेजन्तम् । भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् । (पाणिनिसूत्रम् । ३-४-१६) । पुरा सूर्यस्योदेतो राधेयः । सृपितृदोः कसुन् । (३-४-१७) । पुरा क्रूरस्य विसृपो विरप्सिन् । कृत्यार्थे तवैकेन् केन्यत्वनः । (३-४-१४) । नम्लेच्छितवै नापभाषितवै । दृशे विश्वाय सूर्यम् । आम्न्तम् । कास्प्रत्ययादाममन्त्रे लिटि । (३-१-३५) । कासांचक्रे । चिकीर्षांमास । क्त्वा, ल्यप्, तुमुन्, णमुल्, खमुञन्तम् । क्त्वा—समानकर्तृकयोः पूर्वकाले । (३-४-२१) । भुक्त्वा गतः । ल्यप्—समासेऽनञ्पूर्वे क्त्वो ल्यप् । (७-१-३७) । पलाय्य गतः । तुमुन्—तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् । (३-३-१०) । भोक्तुं याति । णमुल्—आभीक्ष्ण्ये णमुल्च । (३-४-२२) । पायंपायं पिब बहु पयः । निमूलसमूलयोः कषः । (३-४-३४) । समूलकाषं कषति । खमुञ्—कर्मण्याक्रोशे कृञः खमुञ् । (३-४-२५) । चौरङ्कारमाक्रोशति ॥

तसिल्, ह, त्रल्, दा, अधुना, दानीं, र्हिल्, थाल्, धा, ध्यमुञ्, धमुञ्, शस्, च्वि, डाच्, साति, त्रा, कृत्वसुच्, सुच्, तरां, तमां, वति, ना, नाञ्, अस्तात्यर्थाः, सद्य आदयः ॥

पञ्चम्यास्तसिल् । (५-३-७) । सर्वतः । आद्यादिभ्यश्च । (वचनम्) । आदितः । मध्यतः । इदमो हः । (५-३-११) । इह । कुह । सप्तम्यास्त्रल् । (५ ३-१०) । तत्र । किंयत्तदः काले दा । (५-३-१५) । सर्वदा । यदा । तदा । कदा । अस्मिन् काले = अधुना । दानीम् । तदो दाच । (५-३-१९) । तदानीम् । अनद्यतने र्हिल् । (५-३-२१) । कस्मिन् काले = कर्हि । यर्हि । प्रकारवचने थाल् । (५-३-२३) । तथा । सर्वथा । संख्याया विधार्थे धा । (५-३-४२) । एकेन प्रकारेण एकधा । षोढा । एकाद् धो ध्यमुञन्यतरस्याम् । (५-३-४४) । ऐकध्यम् । द्वित्र्योश्च धमुञ् । (५-३-४५) । द्वैधम् । द्विधाच । त्रैधम् । त्रिधा । (धश्चत्रेधाः) एधाच्च । (५-३-४६) । त्रेधा । बहुल्पार्थात् शस् कारकात् (५-४-४२) । अल्पशः । अभूततद्भावे च्विः । (५-४-५०) । शुक्लीभवति । अव्यक्तानुकर-

---

1. अत्र मातृकायां लेखनमतीव संकीर्णम् । अतः विविच्य ससङ्गति लिखितम् । न काऽपि कल्पना कृतेति विभावनीयम् ॥

